# पंचदेव स्वाहाकार पूजन विधिः -

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रकाशक :– प्रेमनाथ शास्त्री
विजयेश्वर-ज्योतिष-कार्यालय गोलगुजराल ( जम्मू )

लक्ष्मी प्रिंटिंग वर्कस, लल कुआँ. देहली में छपा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

## श्री-गणेश-सहस्रनाम –
## –स्वाहाकार पूजन-विधि

फूल अग्नि में डालते हुये पढ़ें :–

भैरवः– देवः पूर्वं पुरारातिः पुरत्रय-जयोद्यमे । अनर्चनात्-गणेशस्य जातो विघ्न-गणाकुलः । मनसा च विनि-र्माय ततस्तु विघ्नकारकम् । महागणपतिं भक्त्या सम्-अभ्यर्च्य यथाविधि । विघ्न-प्रशमनोपायं-पप्रच्छ च परिश्रमम् । संतर्प्य पूजया शम्भो महागणपतिः स्वयं, सर्व-विघ्न-प्रशमनं सर्वाश्रम-फल-प्रदम् । नमस्तस्मै स्वनाम्नैव सहस्रम्-इदम्-अब्रवीत्

तर्पण कीजिये :–

ॐ अस्य श्रीमहागणपति-सहस्रनाम-स्तोत्र-मन्त्रस्य महागणपतिः ऋषिः गणेशो देवता, नानाविधानि छन्दांसि "हुम्" इति बीजं "ॐ" इति शक्तिः स्वाहा-इति कीलकम्-आत्मनो वांग्मनः कायोपार्जित पाप-निवारणार्थे श्रीमहागणपति-प्रसाद-सिद्ध्यर्थे होमे, पाठे, पुष्पार्चने विनियोगः ।



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रकाशक :— प्रेमनाथ शास्त्री
विजयेश्वर-ज्योतिष-कार्यालय गोलगुजराल ( जम्मू )

लक्ष्मी प्रिंटिंग वर्कस, लल कुआँ. देहली में छपा

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# श्री-गणेश-सहस्रनाम —
# —स्वाहाकार पूजन-विधि

फूल अग्नि में डालते हुये पढ़ें :—

भैरवः— देवः पूर्वं पुरारातिः पुरत्रय-जयोद्यमे । अनर्चनात्-गणेशस्य जातो विघ्न-गणाकुलः । मनसा च विनि-र्माय ततस्तु विघ्नकारकम् । महागणपतिं भक्त्या सम्-अभ्यर्च्य यथाविधि । विघ्न-प्रशमनोपायं-पप्रच्छ च परिश्रमम् । संतर्प्य पूजया शम्भो महागणपतिः स्वयं, सर्व-विघ्न-प्रशमनं सर्वाश्रम-फल-प्रदम् । नमस्तस्मै स्वनाम्नैव सहस्रम्-इदम्-अब्रवीत् ३

तर्पण कीजिये :—

ॐ अस्य श्रीमहागणपति-सहस्रनाम-स्तोत्र-मन्त्रस्य महागणपतिः ऋषिः गणेशो देवता, नानाविधानि छन्दांसि "हुम्" इति बीजं "ॐ" इति शक्तिः स्वाहा-इति कीलकम्-आत्मनो वांग्मनः कायोपार्जित पाप-निवारणार्थं श्रीमहागणपति-प्रसाद-सिद्ध्यर्थे होमे, पाठे, पुष्पार्चने विनियोगः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# (अंगन्यास)

षड्-अंगन्यास :–

ॐ गां हृदयाम नमः ॐगीं शिरसि स्वाहा ॐ गूं शिखायै वषट् ॐ गैं कवचाय हुं ॐ गौं नेत्रत्रयाय वौषट् ॐ गः अस्त्राय फट्

करन्यासः - ॐ गां अँगुष्ठाभ्यां नमः, ॐ गीं तर्जनीभ्यां नमः ॐ गूँ मध्यमाभ्य नमः ॐ गैं अनामिकाभ्यां
4 नमः, ॐ गौं कनिष्ठकाभ्यां नमः ॐ गः करतल करपृष्ठाभ्यांनमः,

प्राणायाम करके हाथ में फूल लेकर (ध्यान) पढ़िये :–

विभ्रत-दक्षिण-हस्त-पद्म-युगले, दन्ताक्ष-सूत्रे शुभे । वामे-मोदक-पूर्ण-पात्र-परशू नागोपवीती त्रिदृक्, श्रीमान्-सिंह युगासनः श्रुति युग्मे शंखौ वहन् -मौलिमान्, दिश्यात्-ईश्वरपुत्र एष भगवान्-लम्बोदर-शर्म नः ।

आहुति अग्नि में डालते हुये पढ़ें :–

ॐ "गं" तत् पुरुषाय विघ्नहे स्वाहा, वक्रतुण्डाय धीमहि स्वाहा तन्नो दन्ती प्रचोदयात् स्वाहा ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ॐ गंतत्-पुरुषाय विद्महे वक्रतुण्डाय धीमहि स्वाहा,तन्नोदन्ती प्रचोदयात् स्वहा । (3) ॐ "गं" तत्-पुरुषाय
विद्महे वक्रतुण्डाय धीमिहि, तन्नो दन्ती-प्रचोदयात् स्वाहा ।

अब सावधानी से दोनों आहुति डालने वाला और यजमान एक एक नाम से प्रज्वलित अग्नि में आहुति डालें । हर
एक नाम के आरम्भ में "ॐ" शब्द का उच्चारण करें ( स्वाहा के पश्चात् ॐ न जोडें )
जैसे "ॐ महाविद्यायै-स्वाहा" 100वीं आहुति डालने से पूर्व, ऐसे ही क्रमशः 200वीं आहुति डालने से पूर्व, "स्रुक" (जिस
में एक रन्ध्र होता है से "स्रुव" (जिस में दो रन्ध्र होते हैं । स्रुक से स्रुव को घी से चार बार स्पर्श करते हुये पढें –
तेजोसि, शुक्रम्-असि, ज्योतिर्-असि, धामासि ।

पहले निचले रन्ध्र कोफिर दोबार ऊपर के रन्ध्र को, फिर स्रुव के निचले रन्ध्र को एक बार स्पर्श करके, स्रुव पर श्रीफल,
कन्द या अखरोट रख कर यवतिल की भरी अंजलि हाथ में लेकर गणेश जी का वैदिक मन्त्र पढ़कर 100 वें नाम
की आहुति डालें वैदिक मन्त्र :–

ॐ गणानान्त्वा गणपतिं हवामहे, कविं कवीनां उपमश्रवस्तमं ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनः
शृण्वन्-ऊतिभिः सीद, सादनम् ।



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ऐसे ही हर 100वीं आहुति ऊपर लिखित विधि से अन्तिम् यानी एक सहस्रवीं आहुति तक अग्नि में आहुति डालकर अन्त में फूल अग्नि में डालते हुये पढ़ें :—

**इति वैनायकस्येदं नाम्नां सहस्रम्-ईरितम् । इदं ब्राह्मे मुहूर्ते यः पठति प्रत्यहं नरः, करस्थं तस्य सकलम्-ऐहिकामुष्मिकं सुखम्, आयुर्-आरोग्यम्-ऐश्वर्यम्-धैर्यं शौर्यं बलं यशः । मेधा प्रज्ञा धृतिः कान्तिः-सौभाग्यम्-अति-रूपता । सत्यं दया, क्षमा, शान्ति, दाक्षिण्यं धर्मशीलता, सभा-पाण्डित्यम्-औदार्यं गाम्भीर्यं ब्रह्म-वर्चसम्-ओजस्तेजः कुलं शीलं प्रतापं वीर्यम्-आर्यता । ज्ञानं विज्ञानम्-अस्तिक्यं धनं धान्यं भवेत्-ध्रुवम् शाकिनी, डाकिनी, रक्षो-यक्ष-ग्रहाप-हारकम् साम्राज्य सुखदं सर्व-सपत्न-मद-मर्दनम् । दुःस्वप्न-नाशनं नित्यं स्वामि-चित्त प्रसादनम् । संग्राम-रंगे सर्वेषाम्-इदम्-एकं जय-प्रदम् । गर्भरक्षा करं सर्व वंध्या दोष निवारकम् । पठ्यते प्रत्यहं यत्र स्तोत्रं गणपतेर्-इदम् । देशे तत्र न-दुर्भिक्षम्-ईतयो दुरितानि च, मनोरथप्रदं नित्यं सर्वरोग-विनाशकम्, महागणपतये-नाम्नां सहस्रं पठ्यते तुयः । सायं मध्यं दिने प्रातः तस्य सिद्धिर्-भवेत्-ध्रुवम् ।**



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तर्पण करते हुये पढ़ें :—

अनेन-श्रीगणपति स्वाहाकार-कारहोमेन भगवान् विनायकः एकदन्तः कृष्णपिंगलः गजाननः लम्बोदरः भालचन्द्रः हेरम्भः आखुरथः विघ्नेशः विघ्नभक्षः वल्लभा-सहितः श्रीमहागणेशः प्रीयतां प्रीतोस्तु ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

## सूर्यसहस्रनाम स्वाहाकार पूजन विधिः –

अग्नि में फूल डालते हुये पढ़ें:–

श्रीदेव-उवाचः–श्रृणु देवि प्रवक्ष्यामि सूर्य-नामसहस्रकम्
यस्य तु पाठ-मात्रेण सर्वे नश्यन्ति चामयाः ।

तर्पण करते हुये पढ़ें:– अस्य श्री सूर्य-सहस्र-नाम मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, सूर्यो देवता, ह्रां बीजं, ह्रीं शक्तिः सः कीलकं आत्मनो-वांगमनः कायोपार्जित-पापनिवारणार्थं होमे विनियोगः–ॐ ह्रां हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ ह्रूं शिखायै वषट् ॐ ह्रैं कवचाय हुं, ॐ ह्रौं नेत्राभ्यां वौषट् ॐ ह्रः अस्त्राय फट्, ॐ ह्रां अगुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः, ॐ ह्रूं मध्यमाभ्यां नमः ॐ ह्रैं अनामिकाभ्यां नमः ॐ ह्रौं कनिष्ठकाभ्यां नमः ॐ ह्रः करतल–करपृष्ठाभ्यां नमः ।

प्राणायाम करके हाथ में फूल लेकर पढ़िये (ध्यान)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्रत्यक्ष-देवं विशदं सहस्र-मरीचिभिः शोभित-भूमि-देशम् । सप्ताश्वगं सत्-ध्वज हस्तम्-आद्यं, देवं भजेहं मिहिरं हृदब्जे ।

आहुति डालिये :

(1) भास्कराय विद्महे स्वाहा, सहस्र-रश्मये धीमहि स्वाहा, तन्नः सूर्यः प्रचोदयात् स्वाहा

(2) भास्कराय विद्महे, सहस्ररश्मये धीमहि स्वाहा, तन्नः सूर्यः प्रचोदयात् स्वाहा ।

(3) भास्करायविद्महे सहस्र रश्मये धीमहि धियो यो नः प्रचोदयात् स्वाहा । 

ऊपर लिखे गणेश आदि स्वाहाकार की भाँति एकसहस्र आहुति डाल कर- अन्त में अग्नि में फूल डालते हुये पढ़ें यः पठेत् प्रातर्-उत्थाय भक्त्या नामसहस्रम्-इदं नरः । सौरव्यम-आयुः-तथा-आरोग्यं लभते-मोक्षम्-एवच । आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने जन्मान्तर-सहस्रेषु दारिद्र्यं नोपजायते ।। नमो धर्म निधानाय नमः सुकृत-साक्षिणे नमः प्रत्यक्षदेवाय भास्कराय नमोनमः, उदयन् तु महाभानुः-तेजसा चाभयंकरः, सहस्र-रश्मि दीप्तश्वः-त्वादित्यः प्रीयतां मम ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तर्पण :–

अनेन श्रीसूर्यसहस्र-नाम स्वाहाकार-हेमेन भगवान् ह्रौं ह्रीं सः सूर्यः, सप्ताश्वः अनश्वः एकाश्वः नीलाश्वः प्रत्यक्षदेवः परमार्थसारः तेजोरूपः प्रभासहितः आदित्यः प्रीयतां प्रतोस्तु ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

## विष्णुसहस्रनाम स्वाहाकार पूजन-विधिः—

अग्नि में फूल डालते हुये पढ़ें :—

ॐ नमो नारायणाय-शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्-प्रसन्न-वदनं ध्यायेत्-सर्व-विघ्नोप-शान्तये ।

श्री महादेव उवाच—

ब्रह्महत्या सहस्रस्य पापं शाम्येत्-कथंचन । न-पुनः त्वत्-अवज्ञाने कल्पकोटि-शतैर्-अपि, यस्मात्-त्वयि कृतस्पर्धः पवित्रं स्यां कथं हरे । तन्मे कथय देवेश प्रायश्चितं यथा तथा ।।

श्री भगवान्-उवाच –

सदा नाम सहस्रं मे पावनं मत्-पदावहम् । तत्-पठ-अनुदिनं शम्भो । सर्वैश्वर्यं यदेच्छसि ।

श्री महादेव उवाच –

तम्-एव तपसा नित्यं भजामि स्तौमि चिन्तये, तेन-अद्वितीय-महिमा जगत्-पूज्योस्मि पार्वति ।।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

श्री पार्वती उवाचः –

तत्-मे कथय देवेश-यथाहम्-अपि शंकर सर्वेश्वरी निर्-उपमा तव-स्यां सदृशी प्रभो ।

श्री महादेव-उवाचः –

साधु साधु त्वया पृष्टं विष्णो-र्भगवतः प्रभो नाम्ना सहस्रं वक्ष्यामि मुख्यं त्रैलोक्य-मुक्तिदम् ।

ॐ नमः हृदयाय नमः, "ना" शिरसे स्वाहा "रा" शिखायै वषट् "य" कवचाय हुँ "णा" नेत्राभ्यां वौषट् "य" अस्त्राय फट् ।।



ॐ नमः अंगुष्ठाभ्यां नमः, "ना" तर्जनीभ्यां नमः "रा" मध्यमाभ्यां नमः "य "अनामिकाभ्यां नमः "णा" कनिष्ठकाभ्यां नमः "य" करतल कर पृष्ठाभ्यां नमः ।

तर्पण–

अस्य श्री वासुदेव-सहस्रनामस्य श्रीमहादेव ऋषिः, अनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता, प्रणवो बीजं हरिः शक्तिः आत्मनो, वांग्मनः कायोपार्जित-पाप-निवार-णार्थं श्री विष्णु-प्रीत्य-र्थे पाठे, होमे, पुष्पार्चने विनियोगः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्राणायाम करके दोनों हाथों में फूल पकड़कर ध्यान पढिये –

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगन-सदृशं मेघवर्ण शुभांगम् ।
लक्ष्मी-कान्तं कमलनयनं योगिभि-ध्यान-गम्यं
वन्दे विष्णुं भवभय-हरं सर्वलोकैक-नाथम् ।

अग्नि में आहुति डालते हुये पढ़ें :–

(1) ॐ वासुदेवाय विद्महे स्वाहा, लक्ष्मी नारायणां धीमहि स्वाहा तत्-नो विष्णुः प्रचोदयात्-स्वाहा । 13
(2) ॐ वासुदेवाय विद्महे, लक्ष्मी नारायणाय धीमहि स्वाहा, तन्नो विष्णुः प्रचोदयात स्वाहा
(3) ॐ वासुदेवाय विद्महे-लक्ष्मीनारायणा धीमहि तन्नोविष्णुः-प्रचोदयात्-स्वाहा ।

गणेश स्वाहाकार की भांति हर 100वीं आहुति तेजोसि शुक्रम्-असि ज्योतिर्-असि–धामासि करके 100वीं

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

आहुति डालने से पहले मन्त्र पढ़ें –

ॐ तत्-विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुर्-आततम्-तत्-विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णो-र्यतं-परमं पदम् ।।

एक सहस्रवीं आहुति अग्नि में डालकर फूल अग्नि में डालते हुये पढ़ें :–

पार्वती-उवाच –

14 विष्णो-नाम सहस्रं तत्-प्रत्यहं वृषभ-ध्वज नाम्नैकेन तु येन स्यात्, तत्-फलं ब्रूहि मे प्रभो ।

श्री महादेव उवाच –

रकारादीनि नामानि श्रृण्वतो मम पार्वति मनः प्रसन्नताम्-एति राम-नामाभि-शंकया, रमन्ते-योगिनो यत्र सदानन्दे चिदात्मनि, इति राम पदेनासौ परं-ब्रह्म-अभिधीयते । श्रीराम रामरामेति रमे रामे मनोरमे सहस्रनाम तत्-तुल्यं रामनाम वरानने ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तर्पण करते हुये पढ़ें –

अनेन विष्णु-स्वाहाकार होमेन भगवान् वासुदेवः संकर्षणः प्रद्युम्नः अनिरुद्धः सत्यः पुरुषः अच्युतः माधवः गोविन्दः सहस्रनामा विष्णु लक्ष्मीसहितः-नारायणः प्रीयतांप्रीतोस्तु ।



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# शिवसहस्रन्नाम-स्वाहाकार पूजन विधिः—

अग्नि में फूल डालते हुये पढ़ें :–

ॐ उपमन्युर्-उवाच-यतो लोकाः सम्भवन्ति न भवन्ति यतः पुनः । सर्व-भूतात्मभूतस्य हरस्यामित-तेजसः अष्टोत्तर-सहस्रं तु नाम्नां शर्वस्य मे श्रृणु । यत-श्रुत्वा मनुजश्रेष्ठः सर्वान्-कामान्-अवाप्स्यति ।

तर्पण करते हुये पढ़ें :–

अस्य श्रीशिव-सहस्रनाम-स्तवराजस्य तुण्डि-ऋर्षिः, अनुष्टप् छन्दः, श्रीशिवः परमात्मादेवता आत्मनो वांग्मनः कायोपार्जित-पाप निवारणार्थं शिवप्रीत्यर्थं होमे विनियोगः ।

"ॐ नमः शिवाय" मन्त्रः– ॐ हृदयाय नमः "न" शिरसि स्वाहा "म" शिखायै वषट् "शि" कवचाय हुँ । "वा" नेत्राभ्यां वौषट्, "य" अस्त्राय फट ।

ॐ अंगुष्ठाभ्यां नमः, "न" तर्जनीभ्यां नमः 'मः' मध्यमाभ्यां नमः, "शि" अनामिकाभ्यां नमः, "वा" कनिष्ठकाभ्यां नमः "य" करतलकरपृष्ठाभ्यां नमः ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

प्राणायाम करके फूल हाथ में लेकर (ध्यान) पढ़िये :–

**देवं सुधा-कलश-सोमकरं त्रिनेत्रं, पद्मासनं च वरदाभयदं सुशुभ्रम्-शंखा-भया-ब्जवर-भूषितया च देव्या, वामें-कितं शमन-भंगहरं नमामि ।**

आहुति डालिये :–

**तत्-पुरुषाय विद्महे स्वाहा, महादेवाय धीमहि स्वाहा, तन्नः शिवः प्रचोदयात्-स्वाहा ।**

**तत्-पुरुषाय विद्महे, महादेवाय धीमहि स्वाहा, तन्नः शिवः प्रचोदयात्-स्वाहा ।**

**तत्-पुरुषाय विद्महे, महादेवाय धीमहि स्वाहा, तन्नः शिवः प्रचोदयात्-स्वाहा ।**

ऊपर गणेश स्वाहाकर में लिखी हुई विधि के अनुसार अन्तिम हजारवीं आहुति "तेजोसि, शुक्रम-असि, ज्योतिर्-असि, धामासि से" डाल कर – फूल डालते हुये पढ़ें –

**अष्टोत्तर सहस्रेण जप्यमानस्य शंकर यथाभीष्टं ददत्याशु प्रयतस्य न संशयः, इति महाभारते शान्ति पर्वाणि शिवसहस्रनामस्तुतिः शिवा-र्पणम्-अस्तु ।**



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तर्पणः —

अनेन-शिवसहस्र-नाम-स्वाहाकरहोमेन भगवान् भवः देवः शर्वः देवः, रुद्रः देवः, पशुपतिदेवः, उग्रः देवः, भीमः देवः महादेवः ईशानः देवः, ईश्वरः देवः, उमासहितः शिवः, पर्वती सहितः परमेश्वरः प्रीयतां प्रीतोस्तु ।



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# "ॐ नमो भवान्यै"

ॐ अरि-शंख-कृपाण-खेट-बाणान् । सुधनुः शूलक-तर्जनी दधाना । भवतां महिषोत्तमाङ्ग संस्था नवदूर्वा-सदृशी श्रियेस्तु दुर्गा ।।

ॐ शंख-त्रिशूल-शर-चापकरां त्रिनेत्रां तिग्मेतरांशु-कलया विलसत्-किरीटाम् । सिंह-स्थिताम् -असुर-सिद्धनुतां च दुर्गां दूर्वानिभां दुरित-दुःखहरां नमामि (1) ॐ अकुल-कुल-पतंती चक्रमध्ये स्फुरंती मधुर-मधु पिबंती कंटकान्-भक्षयंती । दुरितम्-अपहरंती साधकान्-पोषयन्ती जयति जगति देवी सुन्दरी क्रीडयंती (2) चतु-र्भुजाम्-एकवक्त्रां पूर्णेन्दु-वदन-प्रभाम् । खड्गक्ति- धरां देवीं वरदा-भयपाणिकाम् (3) प्रेत-संस्थां महारौद्रीं भुजगेनो-पवर्तिनीम् । भवानीं कालसंहार- बद्धमुद्रा- विभूषिताम् (4) जगत्-स्थितिकरीं ब्रह्म-विष्णु-रुद्रादिभिः सुरैः । स्तुतां तां परमेशानीं नौम्यहं विघ्न-हारिणीम् (5)



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

|| ॐ नमो भवान्यै ||

ॐ कैलास शिखरे रम्ये देवदेवं महेश्वरम् । ध्यानोपतम्-आसीनं प्रसन्न-मुखपंकजम् (6)
सुरासुर-शिरो-रत्न-रंजितांघ्रि-युगं प्रभुम् । प्रणम्य शिरसा नंदी बद्धांजलिर्- अभाषत (7)

|| श्री नंदिकेश्वर-उवाच ||

देव-देव जगत्-नाथ संशयोस्ति महान्-मम । रहस्यम्-एकम्-इच्छामि प्रष्टुं त्वां भक्त-वत्सल (8)
देवतायाः-त्वया कस्याः स्तोत्रम्-एतत्-दिवानिशम् । पठयते-विरतं नाथ त्वत्तः किम्-अपरं महत् (9) इति
पृष्टः-तदा देवो नंदिकेन जगत्-गुरुः, प्रोवाच-भगवान्-एको विकसन्-नेत्र पंकजः (10)

श्रीभगवन्-उवाच

साधु-साधु गणश्रेष्ठ पृष्टवान्-असि-मां च यत् । स्कंदस्यापि च यत्-गोप्यं रहस्यं कथयामि तत् (11) पुरा
कल्पक्षये लोकान् सिसृक्षु-मूढ़-चेतसः । गुणत्रय-मयी शक्तिर्-मूल प्रकृति-संज्ञिता (12) तस्याम्-अहं समुत्पन्नः-
तत्त्वैर्-तैर्-महदादिभिः । चेतनेति ततः शक्तिर्-मां काप्या-लिंग्य तस्थुषी (13) हेतुः संकल्प-जालस्य



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

मनोधिष्ठायिनी शुभा इच्छेति परमा शक्तिर्-उन्-मिमील ततः परम् (14) ततो वाक्-इति विख्याता शक्तिः शब्दमयी पुरा । प्रादुर्-आसीत्-जगत्-माता वेदमाता सरस्वती (15) ब्राह्मी च वैष्णवी सैंद्री कौमारी पार्वती शिवा । सिद्धिदा-बुद्धिदा शांता सर्वमंगल-दायिनी (16 ) तयैतत्-सृज्यते विश्वम्-अनाधारं च धार्यते । तयैतत्-पाल्यते सर्वं तस्याम्-एव प्रलीयते (17) अर्चिता-प्रणता ध्याता सर्व-भाव-विनिश्चितैः । आराधिता स्तुता सैव सर्वसिद्धि-प्रदायिनी (18) तस्या-अनुग्रहात्-एव ताम्- एव स्तुतवान्- अहम् । सहस्रैर्-नामभिर्-दिव्यैः-त्रैलोक्य- प्राणि पूजितैः (19) स्तवेनानेन संतुष्टा माम्-एव प्रविवेश सा । तत्-आरभ्य मया प्राप्तम्-ऐश्वरं पदम्-उत्तमम् (20) तत प्रभावात् मया सृष्टं जगत्-एतत्-चराचरम् । ससुरा-सुर-गंधर्व यक्षराक्षस-मानवम् (21) सपन्नगं ससमुद्रं सशैल-वनकाननम् । सराशि-ग्रह-नक्षत्रं पंच-भूत-गुणान्वितम् (22) नंदि-नाम-सहस्रेण- स्तवेनानेन सर्वदा । स्तुवे परापरां शक्तिं ममानुग्रह-कारिणीम् (23) इत्युक्तोप-रतं देवं चराचर-गुरुं विभुम् । प्रणम्य शिरसा नंदी प्रोवाच परमेश्वरम् (24)



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

श्री नंदिकेश्वर उवाच

भगवन्-देव-देवेश लोकनाथ जगत्-पते । भक्तोस्मि तव दासोस्मि प्रसादः क्रियतां मयि (25) देव्याः स्तवम्-इमं पुण्यं दुर्लभं-यत्-सुरैर्-अपि । श्रोतुम्-इच्छाम्यहं देव प्रभावम्-अपि चास्य तु (26)

श्री भगवान् उवाच

श्रृणु नंदिन् महाभाग स्तव-राजम्-इमं शुभम् । सहस्रैर्-नामभिर्-दिव्यैः सिद्धिदं सुखमोक्षदम् (27) शुचिभिः प्रातर्-उत्थाय पठितव्यं समाहितैः ।। त्रिकालं श्रद्धया युक्तैर्-नातः परतरः स्तवः (28) ॐ अस्य श्रीभवानी-नाम-सहस्र-स्त-वराजस्य श्रीभगवान्-महादेव ऋषिः । अनुष्टुप् छन्दः । आद्या शक्तिः । श्रीभगवती भवानी देवता । ह्रीं बीजम् । श्रीं शक्तिः । क्लीं कीलकम् । श्री भगवती भवानी-सन्तोषनार्थं सकलकामना सिद्धयर्थे पाठे विनियोगः ।

अथ करन्यासः

ॐ एकवीरायै अंगुष्ठाभ्यां नमः ॐ मायायायै तर्जनीभ्यां नमः

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ॐ पार्वत्यै मध्यमाभ्यां नमः । ॐ गिरिशप्रियायै अनामिकाभ्यं नमः
ॐ गौर्यै कनिष्ठिकाभ्यां नमः ॐ करालिन्यै करतल-कर पृष्ठाभ्यं-नमः ।

## अथ षड़-अङ्गन्यासः

ॐ एकवीरायै हृदयाम नमः ॐ महामायायै शिरसे स्वाहा
ॐ पार्वत्यै शिखायै वषट् ॐ गिरिश प्रियायै कवचाय हुम्,
ॐ गौर्यै नेत्र-त्रयाय वौषट् ॐ करालिन्यै-अस्त्राय फट्

अथध्यानम्

अर्धेन्दु-मौलिम्-अमलाम्-अमराभिवन्द्याम्' अम्भोज-पाश- सृणि-रक्तकपाल-हस्ताम् । रक्तांग-राग- वसना भरणां त्रिनेत्राम्, ध्याये शिवस्य वनितां-मद-विह्वलांगीम् ।

ॐ बालाक-मण्डलाभासां चतुर्-बाहुं त्रिलोचनाम् । पाशांकुश-शरां चापं धारयंतीं शिवां भजे ।



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

ॐ बीजत्रयाय विद्महे, स्वाहा, तत्प्रधानाय धीमहि स्वाहा,

तन्नः शक्तिः प्रचोदयात् स्वाहा,



बीजत्रयाय विद्महे, तत्प्रधानाय धीमहि स्वाहा,

तन्नः शक्तिः प्रचोदयात् स्वाहा,

बीजत्रयाय विद्महे, तत्प्रधानाय धीमहि,

तन्नः शक्तिः प्रचोदयात् स्वाहा ।

श्री ईश्वर-उवाच

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# पंचदेव श्लोक सग्रह

## गणेशस्तुति

जेतुं यः-त्रिपुरं हरेण हरिणा व्याजात्-बले-र्बन्धने, स्रष्टुं वारि-रुहोत्-भवेन विधिना शेषेण धर्तुं धराम् - पार्वत्या महिषासुर-प्रमथने, सिद्धाधिपैः-र्मुक्तये ध्यातः पङ्च-शरेण लोक-विजये पायात्-स नागाननः (1) विभ्रत्-दक्षिण-हस्त-पद्मयुगले दन्ताक्ष-सूत्रे शुभे वामे मोदक-पूर्णपात्र-परशू नागोपवीती त्रिदृक् । श्रीभानु-सिंह युगासनः श्रुति-युगे शंखौ-वहन्-मौलिमान्-दिश्यात्-ईश्वर-पुत्र-एष भगवान्-लम्बोदरः शर्म नः (2) सिन्दूर-कुंकुम-हुताशन-विद्रुमार्क-रक्ताब्ज दाडिम-निभाय चतु-र्भुजाय । हेरम्ब-भैरवगणेश्वर-नायकाय सर्वार्थसिद्धि- फलदाय नमः शिवाय (3) विघ्नेशो नः स पायात्-विहृतिषु जलधिं पुष्कराग्रेण पीत्वा यस्मिन्-उद्धृत्य हस्तं वमति तत्-अखिलं दृश्यते व्योम्नि देवैः । क्वाप्यम्भः क्वापि विष्णुः क्वचन कमलभूः क्वाप्यनन्तः क्वच श्रीः क्वाप्यौर्वः क्वापि शैलः क्वचन मणिगणः क्वापि नक्रादि-सत्वाः (4) निर्विघ्न-विश्वनिर्माण-सिद्धये यत्-अनुग्रहम् मन्ये स धातापि



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

तस्मै विघ्नजिते नमः, सर्गा-रम्भेपि जाताय वीजरूपेण तिष्ठते धात्रा कृतप्रणामाय गणाधिपतये नमः (5) लाक्षा-सिन्दूर सुर-वर-नमितं मोदकैर्-मोदितास्यं हस्ते दन्तं ददानं दिनकर-सदृशं तेजसोग्रं त्रिनेत्रम् दक्षे रत्नाक्षसूत्रं वरपशुधरं साखु-सिंहा-सनस्थं गांगेयं रौद्र-मूर्तिं त्रिपुर-वधकरं विघ्नभक्षं नमामि (6) गौरीपुत्रं त्रिनेत्रं गजमुख सहितं, नागयज्ञोपवीतं पद्माक्षं सर्वभक्षं सकलजन-प्रियं सर्व-गन्धर्व-पूज्यम् । संपूर्णं भाल-चन्द्रं वरदम्-अतिबलं हन्तृकं चासुराणां हेरम्बम्-आदिदेवं गणपतिम्-अमलं, सिद्धि-धातारम्- ईडे (7) यं ब्रह्मा वेदान्तविदो वदन्ति, परं प्रधानं पुरुषं तथान्ये विश्वत्-गतेः कारणम्-ईश्वरं वा तस्मै नमो विघ्न-विनाशकाय (8) नमो नमः शाश्वत-शान्ति-हेतवे, क्षमादया-पूरित-चारु-चेतसे । गजेन्द्र-रूपाय गणेश्वराय -ते, परस्य पुंसः प्रथमाय सूनवे (9) नमो नमः कारण-कारणायते, नमो नमो मंगल-मंगलात्मने नमो नमो वेदविदां मनीषिणाम्-उपासनीयाय नमो-नमो-नमः (10)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# सूर्यास्तुति

ध्येयः सदा सवितृ-मण्डल-मध्यवर्ती, नारायणः सरिसिजा-सन-सन्निविष्टः । केयूरवान्-कनक- कुण्डलवान्-किरीटी हारी हिरण्मय-वपु-र्धृत-शंख-चक्रः (1) नमोस्तु सूर्याय सहस्र-रश्मये, सहस्र-शाखा-न्वित-सम्भवात्मने । सहस्र-योगोत्-भव-भूति–भागिने, सहस्र- संख्या-युगधारिणे नमः (2) यन्मण्डलं दीप्तिकरं विशालं, तरत्नप्रभं तीव्रम्-अनादि-रूपम् । दारिद्र्य-दुःखक्षय-कारणं च, पुनातु मां तत्-सवितु-र्वरेण्यम् (3) यन्-मण्डलं देवगणैः सुपूजितं, ब्रह्मर्षि-देवर्षि-नृपर्षि-भावितम् तं देव-देवं प्रणमामि सूर्यं, पुनातु मां तत्-सवितु-र्वरेण्यम् (4) यन्मण्डलं ज्ञान-धनं त्वगम्यं, त्रैलोक्य-पूज्यं त्रिगुणात्मरूपम् समस्त-तेजोमय-दिव्य-रूपं, पुनातु मां तत्स-वितु-र्वरेण्यम् (5) यन्मण्डलं गूढम्-अति-प्रबोधं, धर्मस्य वृद्धिं कुरुते जनानाम् । यत्-सर्व-पाप-क्षय-कारणं च, पुनातु मां तत् सवितु-र्वरेण्यम् (6) यन्मण्डलं व्याधि-विनाशदक्षं यत्-ऋक्-यजुः सामसु संप्रगीतम् प्रकाशितं येन च भूर्भुवः स्वः, पुनातु मां तत्सवितु-र्वरेण्यम् (7) यन्मण्डलं वेदविदो वदन्ति, गायन्ति यत्-चारण-सिद्ध-



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

संघाः । यत्-योगिनो व्योम-रथस्थ-सिद्धाः, पुनातु मां तत्-सवितु-र्वरेण्यम् (8) यन्मण्डलं सर्वजनेषु पूजितं, ज्योतिश्च कुर्यात्-इह मर्त्यलोके यत्-काल-कालाद्यम्-अनादि-रूपं, पुनातु मां तत्सवितु- र्वरेण्यम् (9) यन्मण्डलं वेदविदो वदन्ति गायन्ति यत् सिद्धगणा गुहासु सन्ध्या विधौ ब्रह्मविदः स्मरन्ति पुनातु मां तत्-सवितु-र्वरेण्यम् (10)



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

त्वमेव माता च पिता त्वमेव, त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव, त्वमेव सर्वं मम देव देव (1)
शान्ताकारं भुजग-शयनं, पद्मनाभं सुरेशं विश्वाधारं गणन-सुदृशं, मेघ-वर्ण शुभांगम् लक्ष्मी-कांतं कमल-नयनं,
योगिभि-र्ध्यानगम्यं वन्दे विष्णुं भव-भयहरं, सर्व-लोकैक- नाथम् (2) यं ब्रह्मा वरुणेन्द्र-रुद्रमरुतः स्तुवन्ति
दिव्यैः स्तवै वेदैः सांगपद-क्रमो-निषदै-र्गायन्ति यं सामगाः ध्याना-वस्थित-तत्-गतेन मनसा, पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरा-सुर-गणा, देवाय तस्मै नमः (3) ध्येयः सदा परिभवघ्नम्-अभीष्टदोहं, तीर्थास्पदं
शिव-विरिंचि-नुतं शरण्यम् भृत्यार्तिहं प्रणतपाल भवाब्धियपोतं वन्दे महापुरुष ते चरणार-विन्दम् (4) त्यक्त्वा
सुदुस्त्यज-सुरेप्तिसत-राज्य-लक्ष्मीं धर्मिष्ट-आर्य वचसा यत्-अगात्-अरण्यम्। मायामृगं दयित-येप्सितम्-अनुधावत
वन्दे माहापुरुष ते चरणार-विन्दम् (5) श्रीमत्-सरोरुह-यवांकुश- चक्र-चाप-मत्स्यां-कितं नव-विलोहित-



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

पल्लवाभम् । लक्ष्म्या-लयं परम-मंगलम्-आत्मरूपं वन्दे महापुरुष ते चरणार-बिन्दम् (6) वृन्दा-वनान्तरम्-अगात्-अनुगोकुलानां संचार्य सर्व-पशुभिः-स्व-विवृद्धि-कामी सञ्चिन्त-यत्- अजगुरो-मृग-पक्षिणां यत् वन्दे महापुरुष ते चरणार-बिन्दम् (7) यत्-गोपिका विरहजाग्नि-परीतदेहाः तप्तस्तनेषु विजहुः परिरभ्य तापम् । रासे त्वदीय कुच-कुंकुम-पंकलिप्तम् वन्दे महापुरुष ते चरणार बिन्दम् (8) कालीय-मस्तक-विघटन-दक्षम्-अस्य मोक्षोप्सुभि- विर्रहदीन-मुखाभिर्-आरात् । तत्-पत्निभिः स्तुतम्-अशेष-निकाम-रूपं वन्दे महापुरुष ते चरणार बिन्दम् (8) कालीय-मस्तक-विघट्टन-दक्षम् अस्य मोक्षेप्सुभि-विरहदीन-मुखाभिर्-आरात् । तत्-पत्निभिः स्तुतम्-अशेष-निकाम-रूपं वन्दे महापुरुष ते चरणार-बिन्दम् (9) ज्ञानालयं श्रुति-विमृग्यम्-अनादिम्-अर्च्यंब्रह्मा-दिभि-र्हृदि विचिन्त्यम्-अगाध-बोधैः । संसार-कूप-पतितो-त्तरणाव-लम्बं वन्दे महापुरुष ते चरणारविन्दम् (10) येनांग-बाल-वपुषः स्तन पान बुद्धेः त्वत् अंघ्रिणा-हृतम्-अनो विपरीत चक्रम् । विध्वस्त-भाण्डम्-अपतत् भुवि गोप मूर्तेः वन्दे महापुरुष-ते चरणार-विन्दम् (11)



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# शिवस्तुतिः

ध्यायेत्-नित्यं महेशं रजत-गिरिनिभं चारु-चन्द्रावतंसम् रत्ना-कल्पो-ज्ज्वलांगं परशु-मृग-वरा-भीति-हस्तं प्रसन्नम् । पद्मासीनं समन्तात् स्तुतम्-अमर-गणै-र्व्याघ्र-कृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिल-भय-हरं पंचवक्त्रं त्रिनेत्रम् (1) देवं सुधा-कलश-सोम-करं त्रिनेत्रं, पद्मासनं च वरदाऽभयदं सुशुभ्रम् शंखाऽभया-ब्ज-वरभूषितया च देव्या, वामें-कितं शमन-भंगहरंनमामि (2) अहं पापी पाप-क्षपण-निपुणः शंकर भवान् अहं भीतो भीताऽभय-वितरणे ते व्यसनिता ! अहं दीनो दीनोद्धरण-विधि-सज्ज-स्त्वम्-इतरत् न जानेहं वक्तुं कुरु सकल शोच्ये मयि कृपाम् (3) महिम्नः पारं ते परमऽविदुषो यद्य-सदृशी स्तुति-र्ब्रह्मदीनाम्-अपि तदवसन्नास्त्वयि गिरः । अथावाच्यः सर्वः स्वमति-परिणामा-वधिगृणन् ममाप्येष-स्तोत्रे हर निरपवादः परिकरः (4) रथः क्षोणी यन्ता शत-धृतिर्-अगेन्द्रो धनुरथो रथांगे चन्द्रार्कौ रथ-चरण-पाणिः शर इति । दिधक्षोस्ते कोयं त्रिपुर-तृणम्-आडम्बर-विधि विधेयैः क्रीडन्तो न खलु परतन्त्राः प्रभुधियः (5) हस्तिे साहस्रं



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

कमल-बलिम्-आधाय पदयो-र्यत्-एकोने तस्मिन्-निजमुदहरत्-नेत्रकमलम् । गतो भक्त्युद्रेकः परिणतिम्-असौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर ! जागर्ति जगताम् (6) वपुष्प्रादुर्भावात्-अनुमितम्-इदं जन्मनि पुरा पुरारे ! नैवाहं क्वचित्-अपि भवन्तं प्रणतवान् नमन्-मुक्तः सम्प्रत्य-तनुर्-अहम्-अग्ने-प्यनतिमान् महेश ! क्षन्तव्यं तत्-इदम्-अपराध-द्वयम्-अपि (7) कर्पूरगौरं करुणावतारं संसार-सारं भुजगेन्द्र हारम् । सदा रमन्तं हृदयारविन्दे भवं भवानी सहितं नमामि (8) पुष्पाणि सन्तु तव देव मत्-इन्द्रियाणि धूपोगुरु-र्वपुर्-इदं हृदयं प्रदीपः । प्राणा हवींषि करणानि नवाक्षतास्ते पूजाफलं व्रजतु साम्प्रतम्-एष जीवः (9) जन्मानि सन्तु ममदेव शताधिकानि माया च मे विशतु चित्तम्-अबोध-हेतुः । किंच क्षणार्धम्-अपि त्वत् चरणा विन्दात् माऽपैतु मे हृदयम्-ईश ! नमो नमस्ते (10)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# देवी स्तुति

आनन्द-सुन्दर-पुरन्द्र-मुक्त-माल्यं मौलौ हठेन निहितं महिषा सुरस्य । पादाम्बुजं भवतु मे विजयाय मंजु, मंजीर-शिंजित-मनोहरम्-अम्बिकाया (1) उद्दाम-काम-परमार्थ-सरोज-षण्ड चण्ड-द्युति-द्युतिम्-उपासित-षट्-प्रकाराम् । मोह-द्विपेन्द्र-कदनो-द्यत बोध-सिंह लीलागुहां भगवतीं त्रिपुरां नमामि (2) रे मूढाः किम्-अयं वृथैव तपसा काया परि-क्लिश्यते यज्ञै-र्वा बहुदक्षिणैः किम्-इतरे रिक्ती क्रियन्ते गृहाः । भक्तिः-चेप्त्-अविनाशिनी भगवती पादद्वयी सेव्यताम् उन्निद्रा-म्बु-रुहात-पत्र-सुभगा लक्ष्मीः पुरो धावति (4) शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं न चेत्-एवं देवो न खलु कुशलः स्पन्दितुम्-अपि । अतः त्वाम्-आराध्यां हरि-हर-विरिंच्यादिभिर्-अपि प्रणन्तुं स्तोतुं वा कथम्-अकृतपुण्यः प्रभवति (5) माता भवानी च पिता भवानी बन्धु-र्भवानी च गुरु-र्भवानी विद्या-भवानी द्रविणं भवानी यतो-यतो यामि ततो भवानी (6) भावनि त्वं दास्ये मयि वितर दृष्टिं सकरुणाम् इति स्त्रोतुं वाञ्छन्



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

कथयति भवानि त्वम्-इतियः । तदैव त्वं तस्मै दिशसि निज-सायुज्य-पदवीं मुकुन्द-ब्रह्मेन्द्र-स्फुट मुकुट-निराजित-पदाम् (7) भक्तानां सिद्धिदात्री नलिन-युग-करा श्वेतपद्मा-सनस्था लक्ष्मीरूपा त्रिनेत्रा हिमकर-वदना सर्व्वदैत्येन्द्र-ह त्रीं वागीशी सिद्धिकर्त्री सकल-मुनिजनैः सेविता या भवानी नौम्यहं नौम्यहं त्वां हरि-हर-प्रणतां, शारिकां नौमि नौमि (8) उद्यत्-दिवाकर-सहस्र-रुचिं त्रिनेत्रां पद्मासनोपरिगताम्-उरगोपवीताम् रक्ताम्बुजाड्य-कलशा ऽमृतपात्रहस्तां, राज्ञीं भजामि विकसत्-वदना-रविन्दाम् । (9) बीजैःसप्तभिर्-उज्ज्वला-कृतिर्-असौ, या सप्त-सप्ति-द्युतिः सप्तर्षि-प्रणतांघ्रि-पंकजयुगा या सप्तलोकार्ति-हृत् । काश्मीर-प्रवरेश मध्य-नगरे प्रद्युम्न-पीठे स्थिता देवी-सप्तक-संयुता भगवती श्रीशारिका पातु नः (10) ज्वाला-पर्वत-संस्थितां त्रिनयनां पीठ-त्रयाधिष्ठितां ज्वाला-डम्बर-भूषितां सुवदनां नित्याम्-अदृश्यां जनैः । षट् चक्राम्बुज-मध्यगां वरगदाम्भोजा-भयान् बिभ्रतीं चित्-रूपां सकलार्थ-दीपनकरीं ज्वालामुखीं नौम्यहम् (11)

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

## धूपदीप विधि :

पूजा के लिये रखे गये निर्माल्य के पात्र में जल की धारा डालते हुये पढ़ें :—

**ॐ अस्य श्री-आसन-शोधन-मन्त्रस्य मेरुपृष्ठ-ऋषिः सुतलं छन्दः, कूर्मो देवता-आसन-शोधने विनियोगः।**

पृथ्वी माता को नमस्कार करते हुये पढ़ें :—

**पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् ।**

आसन के रूप में पृथ्वी माता को दर्भ अथवा फूल अर्पण करते हुये पढ़ें :—

**ध्रुवा द्यौर्-ध्रुवा-पृथ्वी, ध्रुवासः पर्वता इमे । ध्रुवं विश्वम्-इदं जगत ध्रुवो राजा विशाम्-असि ।**

तिलक-फूल-अर्घ्य चढाते हुये पढ़ें :—

**प्रीं पृथिव्यै आधारशक्त्यै समालभनं गन्धो नमः अर्घो नमः पुष्पं नमः ।**

नमस्कार करते हुये पढ़ें :—

**शुक्लाम्बरधरं विष्णु शशिवर्णं चतुर्भुजम् । प्रसन्न-वदनं ध्याये सर्व-विघ्नोप-शान्तये । अभि-प्रीतार्थ-सिद्ध्यर्थं**



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

।

पूजितो यः सैरैर्-अपि । सर्व विघ्नच्छिदे तस्मै गणाधि-पतये नमः ।

गुरुः-ब्रह्मा, गुरुः-विष्णुः गुरुः-साक्षात्-महेश्वरः । गुरुर्-एव जगत्सर्वं तस्मै श्री गुर-वे नमः ।। ॐ गुरवे नमः, परम गुरवे नमः, पर-मेष्ठिने गुरवे नमः, परमा-चार्याय नमः आदि सिद्धिभ्यो नमः

अंग न्यास-कीजिये अंगन्यास करके चारों दिशाओं की ओर तिल फेंकते हुये पढ़ें :–

अपसर्पन्तु ते भूता ये भूता भुवि संस्थिता, ये भूता विघ्नकर्तारः-ते नश्यन्तु शिवाज्ञया ।।



प्राणायाम कीजिये, प्राणायाम करके मुँह और पैरों को छिडकते हुये पढ़ें :–

तीर्थे स्नेयं तीर्थम्-एव समानानां भवति मानः, शंस्योर्-अर-रुषो धूर्तिः प्राणङ्-मर्त्यस्य रक्षाणो ब्रह्मणस्पते ।

अनामिका अंगुली के ऊपर वाले पर्व पर पवित्र-धारण करते हुये पढ़ें :–

वसोः पवित्रम्-असि शतधारं वसूनां पवित्रम्-असि, सहस्र-धारम्-अयक्ष्मा वः प्रजया संसृजामि रायस्पोषेण बहुला भवन्तीः ।

( जंग चावल आदि लाकर तिलक करना )

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

अपने आपको तिलक अक्षत धूप चढ़ाते हुये पढ़ें :–

**परमात्मने पुरू-षोत्तमाय पंचभूतात्मकाय विश्वात्मने मन्त्रनाथाय आधार-शक्त्यै समाल-भनं गन्धो नमः-अर्घो नमः पुष्पं नमः ।**

चोंग (धीप) को तिलक अक्षत फूल चढाते हुये पढ़ें :–

**"स्वप्रकाशो-महादीपः सर्वत-स्तिमिरा-पहः । प्रसीद नम गोविन्द दीपोयं प्रतिकल्पितः । भो दीप देव-रूवपस्त्वं कर्म-समाप्तिः यावत् स्यात्-तावत् त्वं स्थिरो भव ।**



सूर्यदिवता के निमित्त निर्माल्यपात्र में तिलक अक्षत फूल डालते हुये पढ़ें :–

**यत्रास्ति माता न पिता न बन्धुः-भ्रातापि नो यत्र सुहृत्-जनश्च न ज्ञायते यत्र दिनं न रात्रिः-तत्रात्म-दीपं शरणं प्रपद्ये । आत्मने नारायणाय आधार-शक्त्यै दीप-धूप-संकल्पात्-सिद्धिर्-अस्तु दीपो नमः धूपो नमः। ॐ तत्-सत्-ब्रह्म अद्यतावत्-तिथौ-अद्य ..... मासस्य ..... पक्षस्य तिथौ ..... वासरे दीपोनमः धूपोनमः ।**

**इतिधूपदीप विधिः ।**

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

# पुष्पार्चन

इष्टदेव को सन्तुष्ट करने, मानसिक शान्ति, तथा हर मनोकामना सिद्धि के लिए पुष्पार्चन एक सरल तथा सुगम मार्ग है, हम जब भी चाहें- हर एक व्रत महोत्सव, पर्व अथवा जन्म दिन आदि पर जब हम कोई महान् यज्ञ करने में असमर्थ हूँ तो अवश्य पुष्पार्चन रूपी यज्ञ का प्रोग्राम बनायें ।

विष्णु भगवान् ने शंकर भगवान् को सन्तुष्ट कराने के लिए **"सहस्रपुष्पार्चन्"** किया परन्तु अन्त में हजार पुष्प में एक कम होने पर भक्ति के आवेश में अपना नेत्रकमल हजारवें पुष्प के रूप में अर्पण किया, जिस के फलस्वरूप विष्णु को भगवान् शंकर से सुदर्शनचक्र प्राप्त हुआ ।

पुष्पदन्ताचार्य ने फूल न मिलने पर फूलों के स्थान पर अपने 32 दात पुष्पार्चन के रूप में अर्पण करते हुये महिम्नस्तोत्र के 32 श्लोकों का उच्चारण किया, भगवद्गीता में भगवान् कहते हैं **"पत्रं पुष्पं फलं तोयं"** इन प्रमाणों से स्पष्ट है पुष्पार्चन का पूजा विधान भारतीय पूजा क्रम में प्राचीन काल से प्रचलित है ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

## सहस्रपुष्पार्चन विधिः –

इस पूजा में इष्ट देवता के सहस्र नाम के साथ आरम्भ में "ॐ" और अन्त में "नमः" जोड़कर एक-एक नाम से इष्टदेव पर पुष्प चढाया जाता है, इस पूजा के लिये पुष्प पर्याप्तमात्रा में होने चाहिये (पुष्प की पत्तियाँ अलग अलग करके पूजा में प्रयोग न करें, फूल खण्डित ना हो ) पुष्पार्चन के लिये किसी कमरे में स्वच्छ आसन बिछायें, जहाँ सभी भक्तजन सामूहिक रूप में पूजा में सम्मिलित हो सकें, जो पूजा का मुख्यकर्त्ता अथवा यजमान होगा उसको चाहिये पद्मासन में बैठकर अपने सामने इष्टदेव की मूर्ति उस ढंग से रखे ताकि आप को फूल अर्पण करने में कोई रुकावट न पड़े, पूजा के आरम्भ पर रत्नदीप तथा धूप आदि जलाकर इष्टदेव की मूर्ति को तिलक लगाकर फूलों की मालाओं से सजाइये, पहले आप (यजमान) धूपदीप करे जो इसी पुस्तक में अलग दर्ज है, पूजा में सम्मिलित होने वालों में से जो सहस्रनामवली का उच्चारण कर सके एक एक नाम के आरम्भ में "ॐ" और अन्त में "नमः" जोड़कर इष्टदेवता पर फूल चढ़ायें जैसे ॐ महाविद्यायैः नमः, ॐ जगत मात्रेः नमः "ॐ नारायणाय नमः" "ॐ शिवाय नमः" जो भक्तजन



CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri

पूजा में सम्मिलित होंगे वे भी हरनाम के साथ "नमः" का सामूहिक रूप से उच्चारण किया करें । यज्ञ में स्वाहा, पुष्पार्चन में नमः का प्रयोग होता है ।

हर 100 वीं पुष्पांजलि अर्पण करने के समय इष्टदेव का वैदिक मन्त्र अवश्य पढ़ें जो इसी "पंचदेवस्वाहाकार विधि में दर्ज है गणेश के लिये "गणानान्त्वा" विष्णु के लिये "ॐ तत् विष्णो" शंकर के लिये "योरुद्रोअग्नौ" देवी के लिये "जातवेद से" वैदिक मन्त्र का उच्चारण करें– स्वाहाकार विधि में जिस देवता के लिये जो अंगन्यास तर्पण आदि दर्ज है वह उसी ढंग से करें केवल तेजोसि शुक्रम्-असि, ज्योतिर्, असि, धामासि उच्चारण अथवा प्रयोग न करें, स्वाहा के स्थान पर नमः का उच्चारण करें ।

हजारवीं पुष्पाँजलि डालते समय सभी भक्त खड़े होकर वैदिकमन्त्र और इष्टदेव का कोई श्लोक पढ़कर अन्तिम पुष्पांजलि श्रद्धा से अर्पण करके तर्पण करें– जैसा कि पूजाविधि में दर्ज है आरती आरती आदि करके प्रप्युन करके प्रसाद बाटें ।

CC-0. Late Pt. Manmohan Shastri Collection Jammu. Digitized by eGangotri